# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

कक्षा - **शास्त्री-२ सेमेस्टर-०३** **प्रश्नपत्रम्- ०४** गुणाः - ७०

विषयः - संस्कृतसम्भाषणम् कोड – OE-2.3.3 समयः – ०३:०० तः ०६:००

दिनाङ्कः – २८/११/२०१६ ग्रन्थः – द्वितीया दीक्षा (प्रकाशनम्-राष्ट्रियसंस्कृतसंस्थानम्)

---

**प्रथमान्वितिः (युनिट- १)**

**प्रश्नः १** **कोष्ठके लिखितेषु प्रातिपदिकेषु प्रथमान्तैः रूपैः कानिचन अष्ट रिक्तस्थानानि पूरयतु ।** **08**

**उदाहरणम्-** विद्यालये.........पठतः (छात्र) । **उत्तरम्** – विद्यालये **छात्रौ** पठतः ।

१. इयं भूमिः......वर्तते (मृदु) । २. .......... छात्राः कौमुदीमधीयते (इदम्) ।

३. आपः.......सन्ति (पवित्र) । ४. भारतभूमिः........वर्तते (वीरप्रसू) ।

५. .....संस्कृतार्थिनः स्मः (अस्मद्) । ६. अस्माकं ...........नीतिरस्ति (सरसा) ।

७. प्रातःकाले....उदेति (सवितृ) । ८. ...........संस्कृतं पठथः(युष्मद्) ।

९. .....ऋषी तपश्चरतः (द्वि) । १०. ..........भगवन्तं स्तुवन्ति(ऋषि) ।

**प्रश्नः २** **निम्नेषु अष्टानां प्रथमाविभक्तौ एकवचन-द्विवचन-बहुवचनरूपाणि लिखतु ।** **08**

**उदाहरण** – गो- गौः, गावौ, गावः ।

१. उपानह् २. लिह् ३. भवत् (स्त्री)

४. युष्मद् ५. एतद् (पुं.) ६. गुरु

७. नेतृ ८. सर्व (स्त्री.) ९. मृद्वी

**प्रश्नः ३** **निम्नेषु चतुर्णां प्रातिपादिकविभक्तवचनानि निर्दिशत** **04**

**उदाहरण** – नेता –प्रतिपादिकम् – नेतृ, विभक्तिः- प्रथमाविभ्क्तिः, वचनम्- प्रथमैकवचनम् ।

१. स्वसा । २. विद्यार्थिनौ । ३. भवत्यौ ।

४. वणिजौ । ५. वाचः । ६. विदुषः ।

**प्रश्नः ४** **अधोलिखिततेषु पञ्च वाक्यानि बहुचने परिवर्तयन्तु ।** **05**

**उदाहरणम्** – गौः चरन्ती वर्तते । **उत्तरम्** – गावः चरन्त्यः वर्तन्ते ।

१. शोभनं मनः वर्तते । २. सुन्दरी त्वक् अस्ति ।

३. स्वच्छं सरोजमस्ति । ४. विद्यार्थी कौमुदीं पठति।

५. सरला पुस्तिका अस्ति । ६. शोभनं कर्म करोति ।

७. अध्यापकः पाठं पाठयति । ८. अहमेव मम भाग्यविधाता अस्मि ।

**द्वितीयान्वितिः (युनिट- २)**

**प्रश्नः ५** **कोष्ठेके लिखितेषु प्रातिपदिकेषु द्वितीयान्तैः रूपैः कानिचन अष्टरिक्तस्थानानि पूरयतु ।** **08**

**उदाहरणम्** – भक्तः........पूजयति (भगवत्) । **उत्तरम्** – भक्तः **भगवन्तं** पूजयति ।

१. छात्रः ........प्रणमति (भाग्यविधातृ) । २. गोसेवकाः ........चारयन्ति (गो) ।

३. कृष्णः .......कथयति (मातृ) । ४. भारतीयानां..........प्रत्यास्था वर्तते (क्रान्तिकारिन्) ।

५. सर्वे .......नमस्कुर्वन्ति (भारतभूमि) । ६. भ्रातरः.......आह्वयन्ति (स्वसृ) ।

७. श्वशुरः ..........पृच्छति (जामातृ) । ८. उपासकाः ........अर्चन्ति (सवितृ)

९. जनाः .......धारयन्तिः (मुद्रिका) । १०. बालाः ........पृच्छन्ति (पितृ)

**प्रश्नः ६ निम्नेषु अष्टानां द्वितीयाविभ्क्तौ एकवचन-द्विवचन-बहुवचनरूपाणि लिखतु ।** **08**

**उदाहरण** – विद्या –**विद्यां विद्ये विद्याः**

१. अप्सरस् । २. कीर्ति । ३. भवत् (पुं.) । ४. मातृ । ५. एतद् (पुं.) ६. वपुष् ।

७. कर्तृ । ८. स्त्री । ९. विद्यार्थिन् । १०. चन्द्रमस्

**प्रश्नः ७ निम्नेषु चतुर्णां समुचितविभक्तिरूपैः रिक्तस्थानानि पूरयतु ।** 04

**उदाहरणम् -** ......अभितः वृक्षाः सन्ति (विद्यालय) । **उत्तरम् – विद्यालयम्** अभितः वृक्षाः सन्ति ।

१. .........धिक् (शत्रु) । २. .....विना जीवनं निरर्थकम् (विद्या) ।

३. कृष्णः .......चारयति (गो) ४. भारतीयाः .......पूजयन्ति (भारतभूमि) ।

५. सर्वे......दर्शं पठन्ति (ग्रन्थ) । ६. गोपाः ......अभितः सन्ति । (कृष्ण)

**प्रश्नः ८ अधोलिखितयोः द्वयोः श्लोकयोः द्वितीयान्तानि पञ्च चित्वा लिखतु ।** **05**

१. विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव ।

२. मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ९ अधोलिखितेषु अष्ट वाक्यानि बहुवचने परिवर्तयतु ।** **08**

**उदाहरणम्** – अयं बालकः वर्तते । **उत्तरम्** - इमे बालकाः वर्तन्ते ।

१. इयं बालिका कौमुदी पठति । २. सा नदी अस्ति ।

३. इमौ बुद्धिमन्तौ वर्तेते । ४. एषा कौमुदीम् इच्छति ।

५. स्वच्छपेया नदी अस्ति । ६. अहं विद्यार्थी अस्मि ।

७. सर्वः अध्यापकः पाठं पाठयति । ८. त्वमेव तव भाग्यविधाता असि ।

९. सा विद्यार्थीनी पाठं पाठयति । १०. शोभना कथा वर्तते ।

**प्रश्नः १० निम्नेषु अष्टानां पदानां वाक्येषु प्रयोगं कृत्वा लिखतु** **08**

**उदाहरणम्** – एषः – एषः ग्रन्थः शोभनः अस्ति ।

१. अप्सरः । २. भवत्यः । ३. भवत्यौ । ४. अस्माकम् । ५. अस्मभ्यम् ।

६. सर्व्वासाम् । ७. कर्तारः । ८. सवितरि । ९. चन्द्रमसः । १०. एभिः ।

**प्रश्नः ११ निम्नेषु द्वयोः अव्यययोः प्रयोगं करोतु** **02**

१. विधाय । २. ऋते ।

३. नमस्कृत्य । ४. पुरा ।

**प्रश्नः १२ प्रदत्तवाक्याभ्यां द्वेअव्यये चित्वा लिखतु ।** **02**

१. छात्राः सरस्वती दर्शं दर्शं स्मारं स्मारमेकं ग्रन्थं पठन्ति

२. छात्राः स्वभाग्यं ध्यात्वा स्मृत्वा च पठनकर्माणो भवन्ति ।

***